# Hayagriva Stutih

# હયગ્રીવસ્તુતિઃ

## Document Information

Text title : Hayagriva Stuti

File name : hayagrIvastutiH.itx

Category : vishhnu, vAdirAja, vishnu, stuti

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Malati Shekar, Revathy R.

Latest update : May 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 24, 2024

*sanskritdocuments.org*

# હયગ્રીવસ્તુતિઃ

લસદાસ્ય હયગ્રીવ લસદોષ્ઠદ્વયારુણ ।
લસદ્દન્તાવલીશોભ હયગ્રીવ લસત્સ્મિત ॥ ૧॥

લસત્ફાલ હયગ્રીવ લસત્કુન્તલમસ્તક ।
લસત્કર્ણ હયગ્રીવ લસન્નયનપઙ્કજ ॥ ૨॥

લસદ્વીક્ષ હયગ્રીવ લસદ્ભ્રૂમણ્ડલદ્વય ।
લસદ્ગ્રીવ હયગ્રીવ લસદ્ધસ્ત લસદ્ભુજ ॥ ૩॥

લસત્પાર્શ્વ લસત્પૃષ્ઠ કક્ષાંસયુગ સુન્દર ।
હયગ્રીવ લસદ્વક્ષઃસ્તનમધ્ય વલિત્રય ॥ ૪॥

હયગ્રીવ લસત્કુક્ષે લસદ્રોમલતાઞ્ચિત ।
હયગ્રીવ લસન્નાભે લસત્કટિયુગાન્તર ॥ ૫॥

લસદૂરો હયગ્રીવ લસજ્જાનુયુગપ્રભ ।
હયગ્રીવ લસજ્જાઙ્ઘાયુગ્મ પાદામ્બુજદ્વય ॥ ૬॥

હયગ્રીવ લસત્પાદતલરેખારુણદ્યુતે ।
લસન્નખાઙ્ગુલીશોભ હયગ્રીવાતિસુન્દર ॥ ૭॥

લસત્કિરીટકેયૂરકઙ્કણાઙ્ગદકુણ્ડલ ।
હયગ્રીવ લસદ્રત્નહારકૌસ્તુભમણ્ડન ॥ ૮॥

હયગ્રીવ લસન્મધ્ય લસચ્ચન્દનચર્ચિત ।
લસદ્રત્નમયાકલ્પ શ્રીવત્સકૃતભૂષણ ॥ ૯॥

હયગ્રીવ લસત્કાઞ્ચીરત્નકિઙ્કિણિમેખલ ।
હયગ્રીવ લસદ્વસ્ત્ર મણિનૂપુરમણ્ડિત ॥ ૧૦॥

હયગ્રીવેન્દુબિમ્બસ્થ લસચ્છઙ્ખાક્ષપુસ્તક ।
લસન્મુદ્ર હયગ્રીવ લસદિન્દુસમદ્યુતે ॥ ૧૧॥

હયગ્રીવ રમાહસ્તરત્નકુમ્ભસૃતામૃત ।
હયગ્રીવ સમાનશ્રીચતૂરૂપોપ્રસેવિત ॥ ૧૨॥

હયગ્રીવ સુરશ્રેષ્ઠ હયગ્રીવ સુરપ્રિય ।
હયગ્રીવ સુરારાધ્ય જય શિષ્ટજયેષ્ટદ ॥ ૧૩॥

હયગ્રીવ મહાવીર્ય હયગ્રીવ મહાબલ ।
હયગ્રીવ મહાધૈર્ય જય દુષ્ટવિનષ્ટિદ ॥ ૧૪॥

ભયં મૃત્યું ક્ષયં વ્યર્થવ્યયં નાનામયં ચ મે ।
હરે સંહર દૈત્યારે હરે નરહરે યથા ॥ ૧૫॥

ભક્તિં શક્તિં વિરક્તિં ચ ભક્તિં મુક્તિં ચ યુક્તિદ ।
હરે મે દેહિ દૈત્યારે હરે નરહરે યથા ॥ ૧૬॥

સદા સર્વેષ્ટલાભાય સર્વાનિષ્ટનિવૃત્તયે ।
હયગ્રીવસ્તુતિઃ પાઠ્યા વાદિરાજયતીરિતા ॥ ૧૭॥

ચિન્તામણિર્હયગ્રીવો વશે યસ્ય નિષેવિતઃ ।
સોઽપિ સર્વાર્થદો નૃણાં કિમુતાસૌ હયાનનઃ ॥ ૧૮॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા
હયગ્રીવસ્તુતિઃ સમ્પૂર્ણા ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Malati Shekar

*Hayagriva Stutih*

pdf was typeset on May 24, 2024

Please send corrections to *sanskrit@cheerful.com*